दमयन्त्युवाच।

न मामर्हसि कल्याण पापेन परिशङ्कितुम्।
मया हि देवानुत्सृज्य वृतस्त्वं निषधाधिप॥ ३-७५-१ ॥
तवाभिगमनार्थं तु सर्वतो ब्राह्मणा गताः।
वाक्यानि मम गाथाभिर्गायमाना दिशो दश॥ ३-७५-२ ॥
ततस्त्वां ब्राह्मणो विद्वान्पर्णादो नाम पार्थिव।
अभ्यगच्छत्कोसलायामृतुपर्णनिवेशने॥ ३-७५-३ ॥
तेन वाक्ये हृते सम्यक्प्रतिवाक्ये तथाहृते।
उपायो ऽयं मया दृष्टो नैषधानयने तव॥ ३-७५-४॥
त्वामृते न हि लोके ऽन्य एकाह्ना पृथिवीपते।
समर्थो योजनशतं गन्तुमश्वैर्नराधिप॥ ३-७५-५॥
तथा चेमौ महीपाल भजे ऽहं चरणौ तव।
यथा नासत्कृतं किं चिन्मनसापि चराम्यहम्॥ ३-७५-६ ॥
अयं चरति लोके ऽस्मिन्भूतसाक्षी सदागतिः।
एष मुञ्चतु मे प्राणान्यदि पापं चराम्यहम्॥ ३-७५-७॥
तथा चरति तिग्मांशुः परेण भुवनं सदा।
स विमुञ्चतु मे प्राणान्यदि पापं चराम्यहम्॥ ३-७५-८॥
चन्द्रमाः सर्वभूतानामन्तश्चरति साक्षिवत्।
स विमुञ्चतु मे प्राणान्यदि पापं चराम्यहम्॥ ३-७५-९॥
एते देवास्त्रयः कृत्स्नं त्रैलोक्यं धारयन्ति वै।
विब्रुवन्तु यथासत्यमेते वाद्य त्यजन्तु माम्॥ ३-७५-१०॥
एवमुक्ते ततो वायुरन्तरिक्षादभाषत।
नैषा कृतवती पापं नल सत्यं ब्रवीमि ते॥ ३-७५-११॥
राजञ्शीलनिधिः स्फीतो दमयन्त्या सुरक्षितः।
साक्षिणो रक्षिणश्चास्या वयं त्रीन्परिवत्सरान्॥ ३-७५-१२॥
उपायो विहितश्चायं त्वदर्थमतुलो ऽनया।
न ह्येकाह्ना शतं गन्ता त्वदृते ऽन्यः पुमानिह॥ ३-७५-१३॥
उपपन्ना त्वया भैमी त्वं च भैम्या महीपते।
नात्र शङ्का त्वया कार्या संगच्छ सह भार्यया॥ ३-७५-१४॥

तथा ब्रुवति वायौ तु पुष्पवृष्टिः पपात ह।

देवदुन्दुभयो नेदुर्ववौ च पवनः शिवः॥ ३-७५-१५॥

तदद्भुततमं दृष्ट्वा नलो राजाथ भारत।

दमयन्त्यां विशङ्कां तां व्यपाकर्षदरिंदमः॥ ३-७५-१६॥

ततस्तद्वस्त्रमरजः प्रावृणोद्वसुधाधिपः।

संस्मृत्य नागराजानं ततो लेभे वपुः स्वकम्॥ ३-७५-१७॥

स्वरूपिणं तु भर्तारं दृष्ट्वा भीमसुता तदा।

प्राक्रोशदुच्चैरालिङ्ग्य पुण्यश्लोकमनिन्दिता॥ ३-७५-१८॥

भैमीमपि नलो राजा भ्राजमानो यथा पुरा।

सस्वजे स्वसुतौ चापि यथावत्प्रत्यनन्दत॥ ३-७५-१९॥

ततः स्वोरसि विन्यस्य वक्त्रं तस्य शुभानना।

परीता तेन दुःखेन निशश्वासायतेक्षणा॥ ३-७५-२०॥

तथैव मलदिग्धाङ्गी परिष्वज्य शुचिस्मिता।

सुचिरं पुरुषव्याघ्रं तस्थौ साश्रुपरिप्लुता॥ ३-७५-२१॥

ततः सर्वं यथावृत्तं दमयन्त्या नलस्य च।

भीमायाकथयत्प्रीत्या वैदर्भ्या जननी नृप॥ ३-७५-२२॥

ततो ऽब्रवीन्महाराजः कृतशौचमहं नलम्।

दमयन्त्या सहोपेतं काल्यं द्रष्टा सुखोषितम्॥ ३-७५-२३॥

ततस्तौ सहितौ रात्रिं कथयन्तौ पुरातनम्।

वने विचरितं सर्वमूषतुर्मुदितौ नृप॥ ३-७५-२४॥

स चतुर्थे ततो वर्षे संगम्य सह भार्यया।

सर्वकामैः सुसिद्धार्थो लब्धवान्परमां मुदम्॥ ३-७५-२५॥

दमयन्त्यपि भर्तारमवाप्याप्यायिता भृशम्।

अर्धसंजातसस्येव तोयं प्राप्य वसुंधरा॥ ३-७५-२६॥

āpyāyita – удовлетворённый, утешенный, освежённый;

सैवं समेत्य व्यपनीततन्द्री। शान्तज्वरा हर्षविवृद्धसत्त्वा।

रराज भैमी समवाप्तकामा। शीतांशुना रात्रिरिवोदितेन॥ ३-७५-२७॥